तृद्यमानः, तर्द्यमानः, तितर्दिष्यमाणः-तितृत्स्यमानः, तरीतृद्यमानः ;
तर्दः, तर्दः, तितर्दिषः-तितृत्सः, तरीतृदः ;
तर्दितुम्, तर्दयितुम्, तितर्दिषितुम् तितृत्सितुम्, तरीतृदितुम् ;
तृत्तिः, [1]वितर्दिका,[A] तर्दना, तितर्दिषा-तितृत्सा, तरीतृदा ;
तर्दनम्, तर्दनम्, तितर्दिषणम्-तितृत्सनम्, तरीतृदनम् ;
[2]तर्दित्वा-तृत्त्वा, तर्दयित्वा, तितर्दिषित्वा-तितृत्सित्वा, तरीतृदित्वा ;
वितृद्य, वितर्द्य, वितितर्दिष्य-वितितृत्स्य, वितरीतृद्य ;
[3]दण्डोपतर्दं दण्डेनोपतर्दं वा गाः कालयति ।

तर्दम् २, तर्दित्वा २-तृत्त्वा २, } तर्दम् २, तर्दयित्वा २, } तितर्दिषम् २-तितृत्सम् २, तितर्दिषित्वा २-तितृत्सित्वा २, } तरीतृदम् २ ; तरीतृदित्वा २. }

## (768) " तृन्फ तृप्तौ " (VI-तुदादिः-1308. सक. सेट्. पर.)

### तृम्फादिः ।

' प्रीणने—' इति द्रुमे । इति धा. का. व्याख्यायाम् (2-27) ।

[4]तृम्फकः-म्फिका, तृम्फकः-म्फिका, तितृम्फिषकः-षिका, [5]तरीतृफकः-फिका ;
तृम्फिता-त्री, तृम्फयिता-त्री, तितृम्फिषिता-त्री, तरीतृफिता-त्री ;

---

1. ' संज्ञायाम् ' (3-3-109) इति स्त्रियां भावादौ ण्वुल् । **वितर्दिका**=वेदिः ।
2. ' **उदितो** वा ' (7-2-56) इति इड्विकल्पः । इट्पक्षे ' न क्त्वा सेट् ' (1-2-18) इति किस्त्वनिषेधात् गुणो भवति । इडभावपक्षे चर्त्वे रूपम् ।
3. ' **हिंसार्थानां** च समानकर्मकाणाम् ' (3-4-48) इति णमुल् । ' तृतीयाप्रभृतीन्यन्यतरस्याम् ' (2-2-21) इति समासविकल्पः ।
4. नोपधोऽयं धातुः । नकारस्य, ' नश्चापदान्तस्य झलि ' (8-3-24) इत्यनुस्वारे, ' अनुस्वारस्य ययि परसवर्णः ' (8-4-58) इति परसवर्णो मकारः । एवं सर्वत्र ज्ञेयम् ।
5. यङन्तेऽभ्यासस्य, ' रीगृत्वत इति वक्तव्यम् ' (वा. 7-4-90) इति रीगागमः । यङ्निमित्तकः सर्वत्र, ' अनिदितां हल उपधायाः क्ङिति ' (6-4-24) इति नकारलोपः ।

A. ' दुरीश्वरद्वारबहिर्वितर्दिकादुरासिकायै रचितोऽयमञ्जलिः । ' वैराग्यपञ्चके 3.